## कर्मणि भृतौ । (२२/२९३६)

कर्मणि इति स्वरूपग्रहणम् । कर्मशब्दे उपपदे कर्मवाचिनि करोतेः[1] टप्रत्ययो भवति भृतौ गम्यमानायाम् । भृतिः वेतनं, कर्मनिर्वेशः । कर्म करोति इति कर्मकरः । [2]भृतकः [3]इत्यर्थः । भृतौ इति किम् ? कर्मकारः ॥

## न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु । (२३/२९३७)

[4]शब्दादिषूपपदेषु[5] करोतेः टप्रत्ययो न भवति । हेत्वादिषु [6]प्राप्तः प्रतिषिध्यते । शब्दकारः । श्लोककारः । कलहकारः । गाथाकारः । [7]वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः । पदकारः ॥

## स्तम्बशकृतोरिन् । (२४/२९३८)

स्तम्ब शकृत् इत्येतयोः कर्मणोरुपपदयोः [8]इन्प्रत्ययो भवति[9] ।

[२४३] व्रीहिवत्सयोरिति वक्तव्यम् । (म. भा. २.१०१)

[10]स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः । व्रीहिवत्सयोः इति किम् ? स्तम्बकारः । शकृत्कारः ॥

## हरतेर्दृतिनाथयोः पशौ । (२५/२९३९)

दृति नाथ इत्येतयोः कर्मणोरुपपदयोः हरतेर्धातोः पशौ कर्तरि इन् प्रत्ययो भवति[11] । दृतिं हरति दृतिहरिः पशुः । [12]नाथहरिः पशुः । पशौ इति किम् ? दृतिहारः । नाथहारः ॥

## फलेग्रहिरात्मम्भरिश्च । (२६/२९४०)

फलेग्रहिः आत्मम्भरिः इत्येतौ शब्दौ निपात्येते । फलशब्दस्य [13]उपपदस्य एकारान्तत्वम् इन्प्रत्ययश्च ग्रहेर्निपात्यते । फलानि गृह्णाति इति फलेग्रहिर्वृक्षः । [14]आत्मशब्दस्य उपपदस्य मुमागम इन्प्रत्ययश्च भृञो निपात्यते । आत्मानं बिभर्ति आत्मम्भरिः । अनुक्तसमुच्चयार्थश्चकारः । कुक्षिम्भरिः । [15]उदरम्भरिः ॥

## छन्दसि वनसनरक्षिमथाम् । (२७/३४०८)

'वन षण सम्भक्तौ' (धा.पा.४६३, ४६४), 'रक्ष पालने' (धा. पा.६५८), 'मन्थ विलोडने' (धा. पा. ४२), एतेभ्यः[16] कर्मण्युपपदे [17]छन्दसि विषये इन्प्रत्ययो भवति । '[18]ब्रह्मवनिं त्वा क्षत्रवनिम् सुप्रजावनिं रायस्पोषवनिं पर्यूहामि' (तै. १.३.१.२)। 'गोसनिं वाचमुदेयम्' (अ. वे. ३.२०.१०)। 'यौ पथिरक्षी श्वानौ' (अ. वे. ८.१.९)। 'हविर्मथीनामभ्या ३ विवासताम्' (ऋ. ७.१०४.२०)॥

---

1. धातोः इत्यधिकम् ब. क. 2. भृतकः – कर्मकारः नास्ति फ. 3. इत्यर्थः नास्ति क. 4. शब्दश्लोक कलह गाथा वैर चाटु सूत्र मन्त्र पद इत्येतेषु क.फ.ह. 5. कर्मणि इत्यधिकम् फ. 6. प्राप्ते क. 7. वैरकारः नास्ति फ. 8. करोतेः इत्यधिकम् क, करोतेः धातोः इत्यधिकम् ड. 9. नकारः स्वरार्थः इत्यधिकम् क. 10. स्तम्बकारिः ब. 11. नकारः स्वरार्थः इत्यधिकम् क. 12. उदाहरणमिदं नास्ति ब. फ. 13. एकारान्तत्वमुपपदस्य अ. क. 14. आत्म नास्ति फ. 15. उदरंभरिः नास्ति अ. क. फ. 16. धातुभ्यः इत्यधिकम् क.फ. 17. छन्दसि नास्ति फ. 18. ब्रह्मवनि त्वा क्षत्रवनि त्वा तत्रवनि त्वा क. ड.